Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४१०

Title शुल्व विवरणं

Author ×

Extent ६०  Age ×

Subject श्रौत पद्धति (धर्मशास्त्रं)

© Dharmartha Trust J&K. Digitized by eGangotri

स्तुत्वविवरणम्

४४१०

4410

F

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

शु॰ कं॰ भा श्रीगणेशाय नमः ॥ सत्यप्रसुरूपिणे धाम्ने चतस्रष्वपि दिक्षु निवसनं नद्गणां । प्रतिदिनमन्वामन्वामाशां विदधातियः प्राची १ रज्जुसमासं व्याख्यास्यामः । किमर्थमिदमुच्यते । यदाचार्येणाप्राग्वंशस्य देहान्तविद्धि

१ नेव घृणिमानादीनि परामर्शमात्रेणोक्तानि । तेषां तत्वनिर्णयार्थमिदमुच्यते । ननु चाचार्येणैवैतत्स्पष्टमभिहितं वेदिं पुरस्ताद्यामम्मां त्रीयस्मात् अरत्निं प्राचीमिति । तथा होवंद्याषड्विंश म२

त्प्रक्रमां प्राचीत्रि ८ शतं पश्चात्तिरश्चीं ८ शतं पुरस्तादिति । सदसोपिग्राप्राप्रतिपंचात् नेनाभिहिते ॥ अग्न्यावपि गोरेषु पुरुषो चपेनेकशानविधादिति । अत्रोच्यते । सत्यमेतदुक्तं । किं तु रज्जुसमा

समंतरेणदिग्विभागज्ञानं युक्तमेतदिति न सम्भावयितुं शक्यते । सत्स्वप्येतेषु वेद्यादिप्रमाणेषु पुरुषापरिधानाचीनावेदिः प्रच्यवते । न च प्रारब्धेतरज्जुसमासमंतरेण । रज्जुसमासेन तु दिशः

प्रक्लृप्ताः सर्वत्र समाभवंतीति । अग्न्यावपि रज्जुसमासमंतरेण पुरुषोच्चयेपकथं चिदविक्षिपतरत्नत्रैवैतदुच्यते । अतस्माचार्येणास्त्रशेषमेवेतदुच्यते रज्जुसमासं व्याख्यास्याम इति प्रतिज्ञासूत्रमेतत २५

रज्ज्वा यत्समस्यते संक्षिप्यते स रज्जुसमासः । समासग्रहणं व्यासोपलक्षणार्थमपि समास उच्यते । समचतुरस्राणामुक्तः समास इति । यथा नानाप्रमाणसमासे इति । एवं व्यासोपि । चतुरस्राच

तुरस्रनिर्जिहीर्षन्निति समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन्निति च । अतः समासग्रहणेन व्यासोप्युपलक्ष्यते । इह प्राचमुद्दिशतीति सूत्रं । तथा प्राग्वंशमित्येवमादिदिग्णयत्र । अतो दिक्षु रूप राम॰

णायेदमाह । समे शंकुं निखाय शंकुसंमितया रज्ज्वा मंडलं परिलिख्य यत्र रेखयोः शंक्वग्रच्छाया निपतति तत्र शंकू निहंति सा प्राची । समग्रहणं निम्नोन्नतस्य दासार्थ्य । विषमे हि छाया वैष

म्यं । तत्र दिग्भ्रमः स्पष्टो भवति । तत्र शंकुं निखाय तत्संमितया रज्ज्वा मंडलं परिलिखेत । तत्र च पूर्वापरयोर्लेखयोः शंक्वग्रच्छाया निपातेत् इतरेः शंकू निखनेत ॥ सा दिक् प्राची इहसमानार्थे लक्षणामि १

॰यणात्र४

© Dharmartha Trust J&K. Digitized by eGangotri

तरामतीचीरतिः। आदित्यरश्मयो हि मायूपलक्षितां चक्रतां मन्तरे गोदयः शाम्यते साधपि तं। अतस्त्रायोपमस्त्वादित्यग्रहणाप्रान नु चादित्यश्चित्रास्वामं तरालेऽस्मत्रचा मत्रचोदेति। तत्रान्ते
काहसाध्यकमणिमाची तलभन्ते। दक्षिणायने हि चित्रायामहादित्यरूपमस्थीति। उदगयनेस्वातिमिति। विषुवती पत्वह निचित्रास्वात्योर्मध्य एवोदयः। अतश्च तस्य धोदिने शंकुना नैव छाया
भवति। एवं च सति अहरंतेषु सैव प्राचीन भवतीत्यत्रोच्यते। प्राचमुद्दिश्य तीत्यनेन प्राच्युद्देशेन कृतेऽन्नेकाहः साध्येपि कर्मणि तद्दोषद्वाराभिसंपूहरं तेर दोषो न भवति। अपि चाहर्गणोऽभिप्रकृतोपदेशः
चित्रास्वात्यो रंतरालं प्राचीति। न च तरं त [redacted] रालया दिन्योजहाति। तस्माद्येवोद्देशाकाले प्राची सैव सर्वत्र भवति। इदानीमुदीच्या दिग्देशो ग्रहणायेद
माह॥ तदंतरं रज्वाभ्यस्य पाशौ कृत्वा शंक्वोः पाशौ प्रतिमुच्य दक्षिणायम्य मध्ये शंकुं निहंत्येवमुत्तरतः सोदीची। तयोः शंक्वोः प्राच्यापरयोरंतरालं रज्वाभ्यस्यांतरालाभ्यासेन संभवतीति रज्जुर
भ्यस्यते द्विगुणीक्रियत इत्यर्थः। ततः शंक्वोः पाशौ प्रतिमुच्येत प्रथमाचरमापा मार्थं दूरं रज्जु द्विगुणीक्रियते। द्विगुणीकृता पाचांतयोः पाशौ कृत्वा पादं दूरं रज्जु तस्यां अस्य पाशपार्श्वं दूरं समा
सानार्द्धेन लक्षणे न दक्षिणायम्यापकृष्य मध्ये शंकुं निखनेत्। सा दक्षिणा एवमुत्तरतः सोदीचीदिगिति॥ एवं तयोः पाशौ करोति। न त्वसमया मानं संभवति। अपरं समनिरंछनं समासमासेभ गेषु
लक्षणानि॥ अपरं पुरः समशंकू न तत्परिच्छेदिकां रज्जुर भिधीयते। निरंछनं त्वभ्यास चतुर्थो लखते। वक्ष्यति लिखोपरिष्टात् अभ्यासचतुर्थे लक्षणं करोति। तस्या समास भंगः दूरं रज्वभ्यासं रज्जुसे
त्वयोः समासस्य भंगत्वं रिरित्यर्थः। तत्रापि च लक्षणं प्राच्यंतयोः शंकू निहंति। न त्वसमयामितिर्भवति। अपरं पक्षस्योस्थ्या। मानेन तरकालं मित हे त्पपरिच्छेदाय। शंक्वोः पाशौ प्रतिमुच्यानि

© Dharmartha Trust J&K. Digitized by eGangotri

=अभ्यासचतुर्थे इति। अभ्यासरज्जोश्चतुर्थांशं लक्षणं प्रमाणार्धं चतुर्थांशरूपे निरंछनलक्षणं। निरंछ्यते आकृष्यते अनेनेति निरंछनं आकर्षणरज्जुरित्यर्थः। तत्राह। संख्यासमासभंगादिति। संख्याया दंडरज्जु अभ्यासरज्जोर्यः संख्याया एकत्वलक्षणात् तस्याः समास[illegible]रकीकरणं त[illegible]त्वर्थः

कु॰भा॰ २ छनेनगृहीत्वादक्षिणापूर्वांदिशंहरंति। पूर्वापरांतशंक्वोः पाशौ प्रतिमुच्य निरंछनेन गृहीत्वादक्षिणापूर्वांदिशं हरंति। तत्रांसलक्षणे शंकुः। एवमुत्तरतः। अनेनैव प्रकारेण निरंछनेन गृहीत्वोत्तरपूर्वांदि
शंहरंति। तत्रांसलक्षणे शंकुरेवंतस्यापरवंहरज्ज्वाः अंसपाशाक्षेणिमानार्थेलक्षणं। पुरस्तात्तिर्यङ्मानं अंसशब्देनोक्तं। पश्चात्तिर्यङ्मानं श्रोणिशब्देनोच्यते। विपर्यस्येतरतः। इतरशब्देन पश्चा
द्भाग उच्यते। अत्रापि निरंछनेन पश्चाद्दक्षिणापरांदिशंहरेत। पुनरेवमुत्तरतः श्रोणिलक्षणयोः शंकुनिखनेत्। समाधिः सर्वत्र॥ सर्वक्षेत्रेष्वयं मानप्रकारः। प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं
करोति तन्निरंछनं। रज्जुप्रमाणमभ्यस्य अभ्यासो हि द्विगुणीकरणं। तेनैकादृढरज्जुः अपराभ्यासरज्जुस्तत्राभ्यासचतुर्थे लक्षणं क्रियते। संख्यासमासभंगाच्चतुर्थेलक्षणं गृह्यते नाभ्यास
रज्जोस्तत्रैव षट्सपरिच्छेदा हि तत्तो भवीति। तस्य चतुर्थस्य लक्षणस्य निरंछनसंज्ञा व्यवहारार्था। अत्र रज्जुपातिर्यङ्मानीशेषः। निरंछनेन गृहीत्वा पाश्चात्कृष्यते सा रज्जुपारज्जुरुच्यते। एवंरज्जु
प्रदेशं तरेकरणी तत्र करणीतिर्यङ्मानीपार्श्वमानी रज्जुपरिक्रमवः। याचारज्जुपारज्जुः तिर्यङ्मानाः शेषो भवति। तिर्यङ्मानी च श्रोण्यंसपरिच्छेदिका सा हि पूर्वापरायामायस्यपातिर्यग्भवति। अत्र
रज्जुपारज्जुश्चतच्छेषः। न हि तया विना तिर्यङ्मानी संभवति। न हि तामन्तरेण श्रोण्यंसपरिच्छेदः संभवति। प्रमाणाद्वाभ्यस्याभ्यासषष्ठे लक्षणं करोति तन्निरंछनं। अयमपरो विशेषः। म
हावेद्रेरचमानप्रकारः। प्रमाणाद्वमभ्यस्यते। अष्टादशप्रक्रमोऽभ्यासः। तत्रमूलात्सप्तभागे लक्षणं क्रियते। तन्निरंछनं च भवति। अर्धाद्दं सपरिच्छेदकं एतेव। ततद्वे तु श्रोणोः नहिर्दं॥ राम॰
सपरिच्छेदकं निरंछनाद्वनिरंछनांतरं भवति। श्रोणिपरिच्छेदकं च तत भवति। पश्चात्तिर्यक्त्रिंशत्प्रक्रमपक्षे चैतन्नवति। अत्र रज्जुपातिर्यङ्मानीशेषः। इत्युक्तार्थं। प्रमाणाद्विसमचतुरस्रस्य २

=तिर्यङ्मानी चाभ्यासरज्जोरंशरूपरज्जुभागः ततरकोभागसंख्यदंडरज्जुभ्यस्तु भोगेतिभागपंचभागप्रक्षेपणात्रज्जुस्तिर्यङ्मान्याः शेषो जदति॥४=

© Dharmartha Trust J&K. Digitized by eGangotri

शंकुः । ततश्चाग्न्योरप्यरत्निमात्रे निखातिः । शालावद्दैर्घ्यं दीर्घचतुरस्रस्य । दीर्घचतुरस्रस्यानुपश्चात्स्त्रिकोणा तिर्यङ्मानमुक्तं । भुजस्य मध्ये शंकुः । यथा सदसि नव तिर्यग्भिति । महावेद्यस्तु विंशति
पुरस्तादित्युक्तं । शाकल्यस्यैवं तु भिन्नि एवमेव रज्जुः । एतेन प्राग्वंशवेदिमानानि व्याख्यातानि । अनेन प्रकोणमानप्रवंशवेदिमानानि व्याख्यातानि समचतुरस्रप्राग्वंशशकटमुखाद्वेदि ।
शालामानं च व्याख्यातं । तत्रोदीची प्राचीवत् । तत्रोदगायामत्वाद् उदीची प्राचीवद्भवति । उद्दंडं रज्जुन्यासं कृत्वा मानं कर्तव्यमित्यर्थः । सद्वस्कन्धे वा मानं भवतीति शेषः । सा दक्षिणायामेव ।।
अपरिमितं प्रमाणाद्भूयः । यत्रापरिमितशब्दः श्रूयते तत्रोक्तप्रमाणादधिकं ग्रहीतव्यं ।। बहुत्वे हि श्रूयते अपरिमितशब्दः । बहुत्ववाचकमिति । यथा द्वादशाहो सात्त्वपरिमिता चेति प्रमाणा
शास्त्रप्रमाणान्निर्ह्रासविवृद्ध्योः । यत्र चप्रमाणात् ह्रासविवृद्धी तत्र च प्रमाणाविवृद्धो शास्त्रतः । प्रमाणावशेन वृद्धिः यथा पूर्वयोरग्निभिरति ह्रासो विप्रमाणावशेनैवत द्व हि श्रूयते मिति ह्रा
सवृद्ध्योः । योगश्च । यथा पुरुषान्ते घटते तथा ह्रासविवृद्धी कर्तव्ये । नातिरिक्तन्यूने । द्वादशस्तम्भवितस्तीपदे दक्षिणातः इत्येतद् व्याख्यास्यामः । इत्युक्तमाचार्येण दक्षिणानन्तरस्य वितस्तीपदेनेति दक्षिणाग्निं
मकूत्पातछेदस्तेनेह उच्यते । गार्हपत्याहवनीययोरन्तरं षड्भागसमधावामां तु समं त्रेधा विभज्यापर वितस्तीपलक्षणे दक्षिणायामन्त्येस्मिन्नग्निः । गार्हपत्याहवनीययोरन्तरालं रज्जुं
षड्भागं समविभागाभ्यां कृत्वान्तं तु विभागमहितं त्रिधा विभज्यापर वितस्तीपलक्षणे दक्षिणायामन्तस्मिन्नग्निः कार्यः । विपर्यस्योत्तरतउत्कर्षः । तत्रैवेदिप्रमाणं षड्भागसमधा
वागां तु समं कृत्वा त्रिधा विभज्य विपर्यस्य विपर्यस्य च पूर्वं वितस्तीपलक्षणे नोदगायम्य पूर्वं वितस्तीपे उत्कर्षः । षड्भागसमधावस्य मदर्शनमात्रं । यथा वेद्यंकं सभाष्यते तथाकर

© Dharmartha Trust J&K. Digitized by eGangotri

शु॰ कृ॰ भा
३

रणीपार्श्वे विघंते त्र्युकरो भवति। चात्वालेन सह। चारणाच्चात्वालोकरणं वंशेरणासंचरइति॥ अपिवांतरत्रिभागेनपारज्जा पूर्वोर्द्धे समचतुरस्रं कृत्वा श्रोणपामगिनि। अपिवेति पक्षान्तरं धर्म्मु

कं। उक्तोतरत्रिभागेनोनातरं तररज्जुस्तपाकरणपापूर्वोर्द्धे पूर्वविधौ कृतसमचतुरस्रं कार्यं। तस्य दक्षिणाश्रोणपामगिनिः। विपर्यासोनतरस्रउक्तरः। भवतीतिवाक्यशेषः। विपर्यासाच्चापरा

ईचतुरस्रं कार्यं। क विष्णुपतेरस्यमान्युत्तरवेदिर्भवतीति तस्यैमिदमाह॥ अंगुलैरत्र यक्षमितायाः प्रमाणं। रथ्यक्षकाम्यैचैत्तदृष्टं। तत्राष्टाशीतिशतमीषा। ईषाशब्देन पूर्वापरापामोलक्ष्यते।

चतुः शतमक्षः। अंगुलानांचतुः शतमक्षो भवति। अक्षशब्देन च पश्चाद्दक्षिणोत्तरपामोलक्ष्यते। षडशीतिर्युगं। इति च युगमात्रं चत्वारोष्टकाः शम्या। द्वात्रिंशदंगुलाशम्याभव

तीति यावत्॥ येनक्वोद्विपुरुषसमचतुरस्रं कृत्वा करणीमध्ये पूर्वशंकवः समसमाधिः। दिक्सिद्धिमिपुरुषमात्रमिमीतइति पितृमेधे अपनेत्तस्यैमिदमुक्तं॥ करणीतत्करणीतिर्यङ्मानीपार्श्व

मानीक्षेत्रपार्श्वेति रज्जवः। रज्जुनामेताः संज्ञाः। तत्र करणीनामयया क्षेत्रं परिछिद्यते। यया तत्र च क्षेत्रं परिछिद्यते सा तत्करणी। तिर्यङ्मानी या दीर्घचतुरस्रस्य ह्रस्वा। पार्श्वमानी तस्ये

वदीर्घा। अक्ष्णयासंज्ञापा करणीरज्जुः कोणात्कोणं तिर्यगुपगच्छति। सा क्ष्णयासंज्ञा। पदं तिर्यङ्मानी त्रिपदापार्श्वमानी तस्याक्ष्णयारज्जुर्दशकरणी॥ तिर्यक्क्षेत्रे तिर्यक्पद

प्रमाणा पार्श्वे तत्र त्रिपदपरिमाणं तस्याक्ष्णयारज्जुर्दशकरणी दशपदप्रमाणं रवेदिर्भवती येन तदुक्तं ३३५। द्विपदातिर्यङ्मानी षट्पदापार्श्वमानी तस्याक्ष्णयारज्जुश्चत्वारिंशत्करणी॥ चत्वा राम॰

रिंशदन्तरवेदिर्भवती येन तदुक्तं २० उपरिष्टाद्युगप्रमाणा शम्याप्रमाणा चरथीनात। युगप्रमाणा शम्याप्रमाणोत्तरवेदिप्रमाणा सर्वगाडपरिमेताव॥ द्वौ द्वौ चतुरस्रस्याक्ष्णयारज्जुस्तिर्य ३

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञानीपार्श्वमानीच पृथग्भूतेपत्कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानं। प्रमाणाद्व्यायायाम चतुरश्रं यत्कृतं तस्य स्त्रत्कयारज्जुस्तिर्यङ्मानीपार्श्वमानीच पृथक्कुर्वीनत उभयमपि संक्षि
पति। उभयं क्षेत्रद्वयं क्षेत्रप्रज्ञानम् प्रेक्षापरिच्छेदकं। समाचतुरस्रस्या स्त्रत्कयारज्जुर्द्वि द्विकरणी। द्विक्षेत्रकरणीत्यर्थः। करणीं तृतीयेन वर्द्धयेत्तच्चस्व चतुर्थेना त्मचतुस्त्रिंशोनेन विशेषइति
विशेषः। तृतीयभागाधिककरणी इत्यर्थात् चतुर्थेना त्मचतुस्त्रिंशविभागोनेन। वर्द्धयेत्त्यमपरि विशेषो द्विकरणी प्रमाणे सा तु द्विकरणी।। प्रमाणं तिर्यक् द्विकरण्यायामस्त
स्यास्त्रत्कयारज्जुस्त्रिकरणी।। द्विकरण्युक्ता तृतीयकरणी वक्ष्यमाणा सोच्यते यत्प्रमाणं त्रिगुणं। कर्तुमिष्यते तत्र देव प्रमाणं तिर्यग्भवति। आयामस्तु द्विकरणी तया आयामक्षेत्रस्य या स्त्रत्कयारज्जुः सा
त्रिकरणी त्रीणि क्षेत्राणि संक्षिपतीत्यर्थः। अस्याः मेयाज्जनमाहा। तृतीयकरणी एतेन व्याख्याता। सौत्रामण्यां मुक्तप्रक्रमस्तृतीयेनाह्नेतेनेति। प्रक्रमतृतीयं च नप्रक्रमतृतीयविभागः।
किं तर्हि प्रक्रमतृतीयकरणी रज्जुरुच्यते येन तृतीयकरणी यथा वेदेस्तृतीयो विभागः संक्षिप्यते। एवं हि श्रूयते। वित्तृतीयेयजेत वितृतीयो वै सोमस्य सौत्रामणीति। कथं वेपं वेत तृतीयकर
णी। प्रक्रमक्षेत्रस्य त्रिभिर्नवभागेस्तृतीयो विभागः संक्षिप्यते।। अतश्च तृतीयकरणी सौत्रामण्यां प्रक्रमार्थो न्तृतीयकरणी समासार्थी त्रिकरणी तु न त्रैवमभागत्रयसमासार्थी। नेर्हि स
मासेः प्रक्रमयोरिछिन्नक्षेत्रस्य तृतीयो विभागो लभ्यते। अतश्चात्र प्रक्रमनवभागत्र पकरणेपवप्रक्रमः। तुल्यप्रमाणानां समचतुरस्राणामुक्तः समासः कश्चित्तुल्य द्विकरणी प्रमाणे
न समचतुरस्राणां तुल्यानां समासो विहितः इदानीमतुल्यप्रमाणानां समचतुरस्राणां समासोभिधीयते नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षी। यसीयपश्चियातस्याक्ष्णयार

© Dharmartha Trust J&K. Digitized by eGangotri

शु० क० भा० ऽनेकेषां समस्यतीति समासः। नानाप्रमाणसमासे कर्तव्ये यद्भूमी यो लघुतरं प्रमाणं तं तेन यथा करण्या वर्षीयसो महतः प्रमाणस्य परिच्छेदे कृते ततो महतः पार्श्वमानीं तां तया रज्ज्वा रज्जुः साऽभे
८ प्रमाणे समस्यतीति समासो यं। इदानीं ह्रासकरणोपायमाह। चतुरश्राच्चतुरश्रं निर्जिहीर्षन् यावन्निर्जिहीर्षेत् तावदुद्भयतोपच्छिद्य शंकून् निखाय पार्श्वमानीं कृत्वा पार्श्वमानीं संमितां रज्ज्वा यात्त्रो
यसं हरतीति समासः पच्छेदः साकरणेन निर्ह्रासः। महत्प्रमाणाच्चतुरश्रात्लघुप्रमाणं निर्जिहीर्षन् निर्हर्तुमिच्छन्नपतनं कर्तुमिच्छन्नित्यर्थः। यावन्निर्जिहीर्षेत् निर्हर्तुमिच्छेत्तावन्महतः
क्षेत्रस्योभयतोपच्छिद्य शंकुं निखनेत्॥ शंकुं संमितां च पार्श्वमानीं कृत्वेतरां पार्श्वयां पार्श्वमानीं तां समस्य रज्ज्वा पापयोभयतिनर्थोपसंहरेत् संपादयेत्। तत्रापच्छेदः कार्यः साकरणी यावन्त्तत्रप
रिच्छिद्येत तत्रेतरं निर्हृतं भवति। एष निर्ह्रासः। दीर्घचतुरश्रं समचतुरश्रं चिकीर्षन् मध्ये तिर्यगपच्छिद्यान्यतरद् द्विभज्य पुरस्ताद्दक्षिणतश्चोपदध्यात्। शेषमागन्तुना संपूरयेत् एषणेनो नि
र्ह्रासः। दीर्घचतुरश्रं प्रमाणाद्यत्प्रमाणं तत् समचतुरश्रं कर्तुमिच्छन् मध्ये तिर्यगपच्छिद्यान्यतरद् द्विभज्य पुरस्ताद्दक्षिणतश्चोपदध्यात् शेषमागन्तुना सह पूरयेत्। तस्य च निर्ह्रास
उक्तः। चतुरश्राच्चतुरश्रं निर्जिहीर्षन्नित्यत्र॥ अतिदीर्घं चेति यत्क्षात्मापच्छिद्यापच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसंहरेदित्येक समासः। अथ यद्यतिदीर्घं भवति तत
स्तिर्यक्क्षात्मापच्छिद्यापच्छिद्य नानाप्रमाणसमासेन समस्य शेषस्य च यथायोगमुपसंहारः कार्यः ८ समचतुरश्रं दीर्घचतुरश्रं चिकीर्षन् मध्ये रज्ज्वा यापच्छिद्य विभज्य तत्तत्पुरस्तादुत्तरत रामः
श्चोपदध्याद् द्विधमं चेद्यथायोगमुपसंहरेदित्याह। समचतुरश्रं दीर्घचतुरश्रं कर्तुमिच्छन्मध्ये वा यं भागं रज्ज्वा विभक्तमपच्छिद्य तमभागमविभज्य पुरस्तादुत्तरतश्चोपदध्यात्। ८

© Dharmartha Trust J&K. Digitized by eGangotri

पश्चिमतु विषमक्षेत्रं तदवशिष्टं यथायोगं मुपसंहरेत्॥ प्रमाणं चतुरस्रमादेशादस्मात्॥ अनादेशे प्रमाणं चतुरस्रं भवति। आदेशादस्मात्। द्विप्रमाणा चतुःकरणी त्रिप्रमाणा नवकरणी चतु-
प्रमाणा षोडशकरणी। द्वारत्निप्रमाणा पारज्ज्वामितं क्षेत्रं चतुरश्रं चतुररत्नि भवति। एवं अरत्निप्रमाणा पानवारत्नि क्षेत्रं भवति। चतुररत्नि क्षेत्रे षोडशारत्नि भवति॥ किंचात्र बहूक्तेन॥ यावत्प्रमाणा
रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान्समस्येत्॥ यावत्प्रमाणा रज्जुस्तावतामेव वर्गाणां समासं करोति। वर्गशब्दे न वस्तु संख्या तत्र दृष्टो वोच्यते। यथा पञ्चानां पञ्चविंशतिरित्येवमादि।
अर्द्धप्रमाणेन पादप्रमाणं विधीयते। अर्द्धप्रमाणा पारज्ज्वा चतुर्भागः संक्षिप्यते॥ विधीयत इति संक्षेपार्थः। तृतीयेन नवमोंऽशः। करणी तृतीयविभागो न नवमो भागः संक्षिप्यते चतुर्थेन षोड-
शी कला। चतुर्थभागेन षोडशो भागः। एष निर्ह्रासः समस्य पुरस्तादुक्तं शास्त्रे। तस्य ह्रासस्य पुरस्तादुक्तं शास्त्रे चतुरस्राच्चतुरस्रं निर्जिहीर्षन्निति तत्र। यावत्प्रमाणा रज्जुर्भवतीति विवृद्धि ह्रासो भ-
वति। यावत्प्रमाणा रज्जुर्भवत्यनेन क्षेत्रविवृद्धिरुक्ता। अर्द्धप्रमाणेन पादप्रमाणमित्यनेन च ह्रासः। चतुरस्रं मण्डलं चिकीर्षन्मध्यात्कोट्यां निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति तस्य
तृतीयेन सह मण्डलं परिलिखेत्समाधिः। चतुरस्रक्षेत्र प्रमाणां मण्डलं कर्तुमिच्छन्मध्यात्कोट्यां रज्जुं निपात्य तत्कृत्वा पार्श्वतः सेन मानेन परिलिखेत्॥ तत्र यदतिरिक्तं भवति तस्य तृतीयेन भागेन
सह मण्डलं परिलिखेत् कुर्यात्। मण्डलं चतुरस्रं चिकीर्षन्विष्कम्भं पञ्चदश भागान्कृत्वा द्वावुद्धरेच्छेषः करणी। मण्डलमेवं चतुरस्रं कर्तुमिच्छन्विष्कम्भं पञ्चदशधा कुर्यात्। तत्र द्वावुद्धरेत्तदुपनयेत्। शेषश्च-
तुरस्र करणी। द्रोणचिद्द्रव्यचयकचिकं कचित्प्रउगचिदुभयतः प्रउगः समुह्यपुरीष इत्येते ऽग्नयः। एषां एते आश्रयाः। द्रोणो यावानग्निः सपक्षपुच्छविशेषस्तावच्चतुरस्रं कृत्वा द्रोणाद्दश

© Dharmartha Trust J&K. Digitized by eGangotri

शु॰ का भा॰ भागो वृजद्देपेके॥ तद्दशमेनापच्छिद्यापच्छिद्येकसमासेन समस्य निर्हृत्य सर्वमग्निं कृत्वा पुरस्तात्पश्चाद्वोपदध्यात्॥ द्रोणः समचतुरस्रस्तद्वर्जार्थोपमारंभः। पावनाग्निः सपक्षपुच्छविशेषः चानाम

५ मार्गासमासेन समस्य ता वा चतुरस्रं कृत्वा द्रोणाद्दशभागो वृजद्देपेकदेश इति। तस्मिन्पक्षे तस्यैव दशमेनापच्छिद्येकसमासेन समस्य शेषं सर्वमग्निं तथा चत्वं कृत्वा निर्हृत्य तच्छमगेनः पुरस्ता

त्पश्चाद्वोपदध्यात्। मंडलेप्येवं॥ इयांस्तु विशेषः। चतुरस्रीकृत्य मंडलविधानेन मंडलं कुर्यात्। कृत्तमग्निं च। प्रउगे पावनाग्निः सपक्षपुच्छविशेषस्तावद्द्विगुणं चतुरस्रं कृत्वा पश्चात्पुरस्तात्करणीमध्ये

शंकुर्यो चिश्रोण्योः सोऽग्निः॥ इति निगद्व्याख्यातं। उभयतः प्रउगे तावदेव दीर्घचतुरस्रं कृत्वा करणीमध्ये शंकवः समसमाधिः। एतदपि निगद्व्याख्यातं। प्रउगं चतुरस्रं चिकीर्षन्मध्ये मा

चमपच्छिद्य विपर्यस्येतरत्रोपदध्यात्। यदि दीर्घचतुरस्रसमासेन समस्येत्तत्समाधिः॥ पुनरपि दीर्घसमासेन समस्येत्। उभयतः प्रउगं चेन्मध्ये तिर्यगपच्छिद्य पूर्ववत्समस्येत् कृत्नः। एतेनैव

त्रिकर्णास्तमासो व्याख्यातः प्रकारेण विशेषः। पंचकरणीनां च प्रउगेपच्छिद्य। पंचकरणीनां क्षेत्राणि मेतेन च प्रकारेण समासः। एककरणीनां द्विकरणीनां च समचतुरस्रेपच्छिद्य॥ प्रउगे

पच्छिद्य यथायोगं समस्येत। एककरणीनां द्विकरणीनां पृथक्प्रकारेण समचतुरस्रं कुर्यात्। उत्तरेषु पुरुषोच्चयेनैकशतविधादिषु तत्र ह्रासमः। उत्तरेषु पुरुषाच्चयेनेति पञ्चक्रमाच्चर्येण

तत्रोच्यते। आद्योग्निर्द्विगुणस्त्रिगुणो भवतीति सर्वसमासः। आद्यमग्निं चतुरस्रीकृत्य द्विकरणीसमासेन समस्येत्। त्रिगुणोप्येवं। त्रिकरणीसमासेनेति विशेषः। उभयत्राग्निमाना राम॰

य द्विपुरुषा रज्जू रुन्यादपितव्या। एकविंशतिविधो भवतीति पुरुषाभ्यासः। पूर्वोग्निक्षेत्रप्रमाणेन वा पुरुषप्रमाणेन क्षेत्राभ्यासः कार्यः। तत्र प्रमाणमाह। पुरुषाभ्यासे पावनाग्निः सप ५

© Dharmartha Trust J&K. Digitized by eGangotri

स्य पुच्छविशेषस्यावचतुरस्रं कृत्वा तस्मिन्पुरुषप्रमाणमाह। पुरुषाभ्यासेऽपावानग्निः सपक्षपुच्छविशेषस्यावचतुरस्रं कृतात् तस्मिन्पुरुषप्रमाणमुपदर्श्यात् सपक्षपुच्छेऽग्नौ चतुरस्रीकृते पुरुषप्रमा
णे तेन मवद्ध्यात् अत्राग्निमानायपुरुषप्रमाणमाह। समसं पंचदशभागान् कृत्वा द्वाभ्यां कृतसमासेन समस्येत् स पुरुषः। आद्योऽग्निरष्टमपुरुषप्रमाणः पंचदशभागद्वयेन चाष्टमविभागो भव
ति आद्येऽपि चाद्येऽपि चाग्नावष्टमविभागएव पुरुषः। उह्यापि पुरुषप्रमाणाभ्यासेऽस्मिन्नष्टमविभागेन पुरुषविवृद्धिर्भवति। एवमेकशतविधास्तु पुरुषाभ्यासः कर्तव्यः। तस्य द्वादशमे नपाद्मात्री
भवति पंचमे नवहस्ती॥ तस्य द्वादशमविभागेन पादमात्री भवति पंचमे नवहस्ती पुरुषं वा पंचमेनाभ्यपतोपच्छिद्य पंच भागान्समस्यन्तीयं निर्हृत्य तस्मिन्पुरुषप्रमाणमवदध्यादित्यपरं। पुरु
षस्य पंचविंशतिधा विभक्तस्य पंचसु भागेषु समस्तेन पुरुषतीये च निर्हृते योऽशांगुलं भवति। तत्पुरुषप्रमाणो वद्ध्यादिति अपरमग्निक्षेत्रे समस्ते पुरुषप्रमाणोऽवत्राव हिते प्रति पुरुषम
ष्टांगुलामधिकानि भवंति। पंचदशविभागोऽष्टांगुलं। उक्तार्थमेतत्। पंचारत्नि द्वादशवितस्तिर्विं० शतिशतांगुलः पुरुषो द्वादशांगुलं पदमिति च। एतस्मात्पुरुषाद्विज्ञेयं एतदुक्तं। अरत्निर्विं
शतिशतत्तमोभागोंऽगुलं। पंचमो भागस्त्वारत्निः सचतुर्विंशत्यंगुलो भवति। दशभागश्च वितस्तिः। स च द्वादशांगुलो भवति। एवं नवविधादिष्वपि ज्ञेयं। पुरुषं वा सप्तमेनोपपतोपच्छिद्य सप्त
भागान्समस्य सप्तसप्तमभागमेभागमेऽगुलं निर्हृत्य पुरुषप्रमाणो वद्ध्यादित्यपरं। एवं द्विधादिष्वपि ज्ञेयं॥ नारत्निवितस्तीनां समासो विद्यतेऽसंख्यायोगादिति श्रुतेः। तस्य द्वादशमेनपादमात्री
भवतीत्येवमादिसमानं। संख्यायोगाभ्यप्यत्र भवति पंचारत्निरित्येवमादि। तच्च मति पुरुषमंगुलं दृष्ट्वोऽवसितं। यथाग्निवेदीष्टकाप्रमाणा वर्द्धते तदेव तद्व्याख्यामः। यथा पुरुषोच्चया दग्नि

© Dharmartha Trust J&K. Digitized by eGangotri

शु॰ क॰ भा॰ ६ मानं वर्द्धते एवं वेदीष्टकाप्रमाणान्यपि वर्द्धन्ते। नीहैव हि वृद्धिमनेरण्णा पुरुषेणोद्वपादरत्निमात्रं भवति। न चेष्टका विवृद्ध्या विना पुरुषोद्वपरत्न त्र पर्यन्त इति नियमः यथा पुरुषोद्वपरत्न्या वेदेरपि वृद्धिः। प्रतिपुरुषं
प्रक्रमसमभागविवृद्धिस्तदिदं ग्रन्थकारेणोच्यते। पाकयज्ञी चतुर्दश प्रक्रमास्तं सप्तिपत्तिं त्रीश्च प्रक्रमसमभागास्त एकशतविधे प्रक्रमः। एवं प्रतिपुरुषं प्रक्रमसमभागविवृद्ध्या वृद्धिर्भव
ति। तथा च सूत्रं। एकशतं प्रक्रमसमभागाः प्रक्रमः। द्वितीये वा समसप्तमसुप्रक्रमेषु प्रक्रमसमवधाय तत्सप्तसमभागेन प्रक्रमार्थः। द्वितीयादिषु वा सप्तमसप्रक्रमेषु प्रक्रमसमवदधाति। तुल्यसमभागे
न प्रक्रमार्थः। एवमपि सप्त एवार्थः प्रक्रमेण वा सप्तभागेन प्रक्रमार्थः। अत्रापि सप्त एवार्थः।। एकशतविधान्तः पात्न्यां गार्हपत्यो येषां विंशद्विर्भवति तन्नावदेव योनिर्भवति न वेजाते गार्भयोनिरन्
वृद्धतदिति श्रुतेर्वद्धरत्नप्रतिषेधः।। यावत्प्रमाणानि समचतुरश्राण्येकीकर्तुं चिकीर्षेदेकोनानि तानि तिर्यग्द्विगुणान्येकत एकाधिकानि त्र्यस्रिर्भवति तस्येषुस्तत्करोतीति। यावद्विः
समाणि समचतुरश्राण्येकीकर्तुमिच्छति तावदेकोनानि तानि तिर्यग्द्विगुणान्येकाधिकानि कर्तुमिच्छति। तत्त्वरिच्छेदिका रज्जुर्द्विगुणी क्रियते न वेदिमानं पञ्चाशदङ्गुलं पुरस्तात् पश्चिमेत्येवमादि
भवति।। यतोऽस्य श्रीचतुरश्रीकृते यावन्तः सम्पद्यन्ते। चतुरश्रं तु यावद्विः प्रमाणैः कर्तुमिष्यते एकोनद्विगुणां रज्जुरेकाधिकमितानि त्र्यस्रो कृते पुतस्यायामस्य हंसे पक्षो भवति। इषुकरणी
मोक्त्वा शुल्बकारेणाचोदिता। यथा पूर्वं वेदिर्वर्द्धनमिति सत्तदुच्यामः। पारञ्जेरेकाक्षोपरवांसो पत्तिस्तचरथा क्षालस्याश्चतुर्विंशो भागः प्रक्रमः। एतत्प्रयासमप्रमाणान्तरालपक्षे भवति।। राम॰
ते न वेदिं निमाय पञ्चाशदङ्गुलं पुरस्तात् पश्चिमेत्यावधाकोऽरत्नी तांश्च समवधाय तस्मिन्नपान्निनोति पार्श्वयोर्वा द्वमंत्त वे हीति श्रुते रद्धकाने के प्रथ ग्रोन्नमोमरुतिवत। पारञ्जेरेकाद ६

© Dharmartha Trust J&K. Digitized by eGangotri

शोपरत्वं तत्संक्षिपति दशाचरथाख्यानित्यादि रक्तः ॥ छि षा शिरं खडिनी वेदिर्भवति भवंति चात्र श्लोकाः ॥ एतच्चरथाक्षमात्रां नराल पक्षे भवतितेन वेदिनिमाय द्वादशांगुलं ॥ पुरस्तादपचि
घे स्पेवमादिर्भवति । नहि वेदिप्रपयेोर्गगिलक्षणासंयोग इति सिद्धं ॥ इत्युपाध्यायकर्ककृतौ शुल्वविवरणं समाप्तं ॥ -॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

रामं०
७

© Dharmartha Trust J&K. Digitized by eGangotri

कृत्यमाघपद्धतिः

श्लो २५०

© Dharmartha Trust J&K. Digitized by eGangotri